# पञ्चमः अध्यायः

## *महिलाभिः परिवर्तितः संसारः*

गताध्यायेषु वयं दृष्टवन्तः यत् केन प्रकारेण महिलाभिः करणीयं गृह्यकार्यं, कार्यम् एव न मन्यते। अस्माभिः एतत् अपि पठितं यत् गृह्यकार्यस्य सम्पादनं तथा च परिवारस्य सदस्यानां पर्यवेक्षणं सम्पूर्णस्य समयस्य कार्यम् अस्ति अपि च एतत् कार्यं प्रारब्धुं समापयितुं च कश्चन निश्चितः कालः अपि नास्ति। अस्मिन् अध्याये वयं गृहात् बहिः क्रियामाणानां कार्याणां विषये अवगमिष्यामः द्रक्ष्यामः च यत् कथं केचन व्यवसायाः महिलानाम् अपेक्षया पुरुषाणां कृते आधिक्येन उपयुक्ताः स्वीक्रियन्ते। वयम् एतत् अपि ज्ञास्यामः यत् समानतायाः प्राप्त्यर्थं स्त्रीभिः कीदृशाः सङ्घर्षाः कृताः। प्राक्तने काले अपि च अस्मिन् काले अपि शिक्षाप्राप्तिः कश्चित् एतादृशः उपायः अस्ति यस्य माध्यमेन स्त्रीणां कृते नूतनाः अवसराः कल्पयितुं शक्यन्ते। सह एव अस्मिन् अध्याये वयं साम्प्रतं विगतेषु वर्षेषु महिलान्दोलनैः भेदभावं आह्वयितुं कृतानां विभिन्नानां प्रयत्नानां विषये अपि संक्षेपेण ज्ञास्यामः।



## कः किं कार्यं करोति ?

निम्नलिखितजनानां चित्राणि निर्मान्तु-

| | | |
|---|---|---|
| कश्चन कृषकः | कश्चन वस्त्रोद्योगस्य श्रमिकः | काचित् परिचारिका |
| कश्चन वैज्ञानिकः | कश्चन वायुयानचालकः | कश्चन कृषकः |

चलामः, अधुना भवतां कक्ष्यायाः निर्मितचित्राणि द्रष्टुम्, अधोलिखितां तालिकां पूरयन्तु । अधुना प्रत्येकं व्यवसायस्य कृते पुरुषाणां महिलानां च चित्राणि पृथक्-पृथक् योजयन्तु ।

| वर्गः | पुरुष-चित्रम् | महिला-चित्रम् |
|---|---|---|
| शिक्षकः | | |
| कृषकः | | |
| वस्त्रोद्योग-श्रमिकः | | |
| परिचारिका | | |
| वैज्ञानिकः | | |
| वायुयानचालकः | | |

*किं महिलानाम् अपेक्षया पुरुषाणाम् अधिकानि चित्राणि सन्ति?*

*कीदृशेषु व्यवसायेषु स्त्रीणाम् अपेक्षया महिलानां चित्राणि न्यूनानि सन्ति ?*

*किं सर्वैः परिचारिकायाः कृते महिलायाः एव चित्रं निर्मितम् अस्ति? किमर्थम्?*

*किं महिलाकृषकाणां चित्राणि तुलनात्मकरूपेण अल्पतराणि सन्ति? यदि सन्ति तर्हि एतस्य किं कारणम् अस्ति?*



*भारते 83.6 प्रतिशतं महिलाः क्षेत्रेषु कार्यं कुर्वन्ति । तासां कार्येषु पादपानां रोपणम् अनिष्टतृणस्य निष्कासनं सस्यकर्तनं तथा च कुट्टनम् इत्यादीनि कार्याणि सम्मिलितानि सन्ति । पुनरपि यदा वयं कृषकस्य विषये चिन्तयामः तदा वयं कस्यचित् पुरुषस्य विषये एव चिन्तयामः।*

*(स्रोतः – एकषष्टितमः (61) नेशनल- सैंपल-सर्वे, 2004-05)*

*निजकक्ष्यायां कृतस्य अभ्यासस्य तुलनां रोजीमान्यायाः कक्ष्यायां कृताभ्यासेन सह कुर्वन्तु ।*

*रोजीमान्यायाः कक्षायां त्रिंशत् बालकाः सन्ति । सा स्वकक्ष्यायाम् एतादृशमेव अभ्यासं कारितवती । परिणामः अनेन प्रकारेण आसीत्-*

| वर्गः | पुरुष-चित्राणि | महिला-चित्राणि |
|---|---|---|
| शिक्षकाः | 05 | 25 |
| कृषकाः | 30 | 0 |
| वस्त्रोद्योगस्य श्रमिकाः | 25 | 05 |
| परिचारिकाः (नर्स) | 0 | 30 |
| वैज्ञानिकाः | 25 | 05 |
| वायुयानचालकाः | 27 | 03 |

***न्यूनाः अवसराः कठोराः अपेक्षाः***

रोजी-मान्यायाः कक्ष्यायाः अधिकतरैः बालकैः परिचारिकायाः कृते महिलायाः तथा च वायुयानचालस्य कृते पुरुषाणां चित्राणि रचितानि। एतादृशं ते एतस्मात् कारणात् कृतवन्तः यतोहि ते अनुभूतवन्तः यत् गृहाद् बहिः अपि महिलाः कानिचन विशिष्टानि कार्याणि एव सम्यक्प्रकारेण कर्तुं शक्नुवन्ति। उदाहरणार्थं बहवः जनाः मन्यन्ते यत् महिलाः उत्तमाः परिचारिकाः भवितुं शक्नुवन्ति यतोहि ताः आधिक्येन सहनशीलाः विनम्राः च भवन्ति । तासाम् एतत् कार्यं परिवारे स्त्रीणां दायित्वेन सह योजयित्वा दृश्यते। अनेन एव प्रकारेण मन्यते यत् विज्ञानार्थम् अभियान्त्रिक-मस्तिष्कस्य आवश्यकता भवति तथा च बालिकाः महिलाः च अभियान्त्रिकं कार्यं कर्तुं सक्षमाः नैव भवन्ति।

अनेके जनाः एतादृशीषु रूढिवादिषु धारणासु विश्वसन्ति । अतः नैकाभिः बालिकाभिः चिकित्सक-शिक्षायै आभियान्त्रिक-शिक्षायै तत्प्रशिक्षणाय च, सः सहयोगः न प्राप्यते यः बालकैः प्राप्यते अधिकांशपरिवारेषु विद्यालयीयायाः शिक्षायाः अनन्तरं बालिकाः एतं विषयं प्रति प्रेर्यन्ते यत् ताः विवाहम् एव स्वजीवनस्य मुख्यलक्ष्यं चिन्वन्तु।

एतस्य अवगमनम् आवश्यकम् अस्ति यत् वयम् एतादृशे समाजे निवसामः यत्र सर्वे बालकाः परितः स्थितेन संसारेण प्रदत्तेन अवसादेन ग्रस्ताः भवन्ति।
कदाचिद् अयम् अवसादः ज्येष्ठैः, मातृपितृभ्यां च कृतानाम् अपेक्षाणां कारणेन भवति, कदाचित् च मित्रैः कृतेन उपहासेन अपि बालकः अवसाद-ग्रस्तः भवति।
बालकेषु तथा सेवाकार्यं प्राप्तुम् अधिकं बलं दीयते यस्मिन् सेवाकार्ये ते अधिकं धनं प्राप्नुयुः। यदि ते अन्येषां बालकानाम् इव व्यवहारं न कुर्वन्ति तर्हि तैः सह विद्वेषः क्रियते अपि च तेषां भर्त्सना क्रियते । भवद्भिः स्मृतं स्यात् यत् षष्ठकक्ष्यायाः पुस्तके भवद्भिः पठितम् आसीत् यत् बालकाः बाल्यकालात् एव अपरेषां पुरतः बालकेषु रोदितेषु सत्सु ते जुगुप्सा-दृष्ट्या दृश्यन्ते।

## गतानुगतिकतां त्रोटितवती अस्ति



*रेलयानस्य इंजिनम् इत्यस्य सञ्चालनं पुरुषाः कुर्वन्ति । परन्तु झारखण्डस्य कस्यचित् निर्धनस्य आदिवासि-परिवारस्य सप्तविंशतिवर्षीया महिला लक्ष्मीलाकरा एतां परम्परां परिवर्तितवती । उत्तरी-रेलमार्ग-विभागस्य सा प्रथमा महिला-इंजन-चालिका अस्ति ।*

*लक्ष्म्याः पितरौ साक्षरौ न स्तः परन्तु ते स्वपुत्रान् पाठयितुम् अतीव सङ्घर्षं कृतवन्तौ । लक्ष्म्याः शिक्षा एकस्मिन् सर्वकारीये विद्यालये जाता । विद्यालये पठनेन सह एव लक्ष्मीः गृह्यकार्येषु अन्येषु दायित्वेषु च अपि पितॄणां सहयोगं करोति स्म । सा दत्तचेतसा परिश्रमेण च अध्ययनं कृतवती अपि च विद्यालयीयम् अध्ययनं सम्पाद्य इलेक्ट्रानिक्स अर्थात् वैद्युतिकशास्त्रे विषये उपाधिम् अर्जितवती । पुनः सा रेलवे-बोर्ड इत्यस्य परीक्षायाम् भागं गृहीतवती तथा च प्रथमेन प्रयासेन एव उत्तीर्णतां प्राप्तवती ।*

*लक्ष्मी कथयति "आह्वानैः सह क्रीडनं मह्यं रोचते अपि च यस्मिन् काले कश्चित् कथयति यत् एतन्नामकं कार्यं बालिकानां कृते नास्ति तदा अहं तत् कार्यं कृत्वा एव विश्रान्तिं गच्छामि"। लक्ष्म्याः जीवने एतादृशाः अनेके अवसराः समागताः । यथा- यदा सा विद्युत्-शिक्षां प्राप्तुम् इच्छति स्म यदा सा पालीटेक्नीक इत्यस्मिन् द्विचक्रिकायानं चालितवती तथा च यदा सा निश्चितवती यत् सा इंजन-चालिका भविष्यति।*

*तस्याः दृष्टिकोणः सरलः अस्ति यावत् पर्यन्तम् अहम् आनन्दम् अनुभवामि अपि च अहं कस्यापि हानिं न कुर्वती अस्मि अपि च सम्यक्प्रकारेण व्यवहरामि निवसामि च तथा च स्वमातापित्रोः साहाय्यं कुर्वती अस्मि तर्हि अहं स्व-शैल्या जीवनस्य यापनं किमर्थं न कुर्याम्?"*

(ड्राइविंग हर ट्रेन, नीता लाल,वीमेन्स.फीचर सर्विस इत्यस्मात् रूपान्तरितम्}

### परिवर्तनाय शिक्षणम्

*अधोलिखितां कथां पठन्तु तथा च तदनन्तरं प्रदत्तप्रश्नानाम् उत्तराणि यच्छन्तु -*

*यदि भवन्तः जेवियर इत्यस्य स्थाने अभविष्यन् तर्हि कान् विषयान् अचेष्यन् ?*

*स्वानुभवस्य आधारेण ज्ञापयन्तु यत् बालकैः एतादृशाः के के अनुभवाः सोढव्याः भवन्ति?*

विद्यालयस्य गमनं भवतां जीवनस्य नितरां महत्त्वपूर्णः भागः अस्ति। यथा यथा विद्यालयेषु प्रतिवर्षम् अधिकाधिक-सङ्ख्यायां बालकाः प्रवेशं स्वीकुर्वन्ति वयं चिन्तयामः यत् सर्वेषां बालकानां कृते ***विद्यालय-गमनं कश्चन सामान्यः विषयः अस्ति । अद्यत्वे अस्माकं कृते इदं कल्पनम् अपि कठिनम् अस्ति यत् - केषाञ्चित् बालकानां कृते विद्यालय-गमनं पठनं च, 'तेषां प्राप्तेः विषयः नास्ति' अथवा 'इयं वार्ता अनुचितवार्ता' इति अपि मन्तुं शक्यते ।***






परन्तु अतीतकाले लेखनं पठनं च केचन जनाः एव जानन्ति स्म । अधिकांशतः बालकाः तदेव कार्यं शिक्षन्ते स्म यत् कार्यं तेषां परिवारे भवति स्म अथवा तेषां पूर्वजाः वरिष्ठाः च कुर्वन्ति स्म । बालिकानां स्थितिः इतोऽपि दयनीया आसीत् । तेषु समाजेषु यत्र बालकाः लेखितुं पठितुं च शिक्ष्यन्ते स्म बालिकानां कृते कस्यचित् अक्षरस्य अपि

शिक्षणस्य अनुमतिः नासीत् । येषु परिवारेषु कुम्भकारशिल्पः वस्त्रवयनं हस्तकलाः च इत्यादयः शिक्ष्यन्ते स्म तत्र अपि इयम् अवधारणा आसीत यत् महिलानां बालिकानां च कार्यं केवलं साहाय्यं यावत् एव सीमितम् अस्ति । उदाहरणार्थं कुम्भकारस्य व्यवसाये बालिकाः मृत्तिकायाः एकत्रीकरणं कुर्वन्ति स्म तथा च निर्माणार्थं सज्जीकुर्वन्ति स्म । यतोहि ताः चक्रं न चालयन्ति स्म, अतः ताः कुम्भकाराः इति न मन्यन्ते स्म ।



एकोनविंशत्यां शताब्द्यां प्रायः 200 वर्षेभ्यः पूर्वं शिक्षायाः विषये वहुविधाः विचाराः प्रादुर्भूताः । विद्यालयानां प्रचलनम् आधिक्येन जातं तथा च ते समाजाः ये स्वयं कदाचित् साक्षराः न आसन् ते अपि स्वबालकान् विद्यालयं प्रति प्रेषयितुम् आरब्धवन्तः । तदा अपि बालिकानां शिक्षायाः महान् विरोधः जातः । एतद् अतिरिच्य बहुभिः पुरुषैः महिलाभिः च बालिकानां कृते विद्यालयस्य उद्घाटनस्य प्रयत्नाः कृताः । स्त्रीभिः साक्षरता-प्राप्त्यै सङ्घर्षः कृतः।

***रमाबाईमहोदया(1858-1922) स्वपुत्र्या सह।***

***महिलाशिक्षायाः एषा योद्ध्री स्वयं कदाचिदपि विद्यालयं न गतवती परन्तु स्वमाता-पितृभ्यां सा पठनं लेखनं च शिक्षितवती । तस्यै पण्डिता इति उपाधिः प्रदत्ता यतोहि सा संस्कृतं पठितुं लेखितुं च जानाति स्म एतत्कार्यं तदानीन्तनीनां महिलानां कृते महती उपलब्धिः आसीत् । महिलानां कृते तदा संस्कृतस्य ज्ञानार्जनस्य अनुमतिः न आसीत् । सा 1898 तमे वर्षे पुणे-नगरस्य समीपे खेडग्रामे एकां संस्थां स्थापितवती यत्र विधवा-स्त्रीभ्यः निर्धनमहिलानां च कृते पठनस्य लेखनस्य तथा च स्वतन्त्रजीवनस्य शिक्षा दीयते स्म । तेषां कृते काष्ठवस्तुनिर्माणस्य मुद्रणालय-सञ्चालन-सदृशानां च कौशलानाम् अपि प्रशिक्षणं दीयते स्म यत् प्रशिक्षणं वर्तमाने काले अपि न्यूनतया एव बालिकानां कृते दीयते । उपरि वामतः प्रदत्ते चित्रे तस्य मुद्रणालयः दृश्यते । रमाबाईमहोदयायाः संस्था अद्यापि सक्रिया अस्ति।***

आगच्छन्तु वयं राससुन्दरीदेव्याः अनुभवान् पठामः या द्विशतं वर्षेभ्यः पूर्वं पश्चिमबङ्गप्रान्ते जन्म लब्धवती आसीत् । वयसः षष्टिवर्षे सा बाङ्ग्लाभाषायाम् आत्मकथां लिखितवती । तस्याः पुस्तकम् आमार-जीबोन इति कयाचित् भारतीयमहिलया लिखिता प्रथमा आत्मकथा अस्ति । राससुन्दरीदेवी कस्यचित् धनाढ्यपरिवारस्य गृहिणी आसीत् । तस्मिन् काले जनानां विश्वासः आसीत् यत् काचित् बालिका साक्षरा भवति तर्हि सा स्व-पत्युः कृते दुर्भाग्यं लाति तथा च सा विधवा भवति । एतद् अतिरिच्य सा स्वविवाहस्य बहुकालानन्तरं स्वयमेव निलीय निलीय पठितवती । "अहम् अत्यन्तं प्रातःकाले एव कार्यस्य आरम्भं करोमि स्म तथा च अर्धां रात्रिं यावत् कार्ये संलग्ना भवामि स्म । मध्ये अपि विश्रान्तिं न स्वीकरोमि स्म । तस्मिन् काले अहं केवलं वयसा चतुर्दशवर्षीया आसम् । मम मनसि कश्चित् अभिलाषः उदीयमानः जातः - अहं पठनं ज्ञास्यामि शिक्ष्ये तथा च काञ्चित् धार्मिकीं पाण्डुलिपिं पठिष्यामः। अहम् अभागिनी आसम् । तेषु दिवसेषु स्त्रियः न पाठ्यन्ते स्म । पश्चात् अहं स्वयमेव स्वविचाराणां विरोधं कर्तुम् आरब्धवती । अहं किं चिन्तयामि किं जातं च ? स्त्रियः नैव पठन्ति पुनरपि अहं कथं पठिष्यामि ? पुनरपि अहं स्वप्नं दृष्टवती अहं चैतन्यभागवतस्य (कस्यचित् सतः) जीवनचरितं पठामि स्म । पश्चात् दिवसे यदा

शिक्षां प्राप्य काश्चन महिलाः समाजे स्त्रीणां स्थितेः विषये प्रश्नान् कृतवत्यः। ताः असमानतायाः विषये स्वस्य अनुभवानां वर्णनं कुर्वत्यः कथाः पत्राणि आत्मकथाः च लिखितवत्यः। स्वलेखेषु ताः स्त्रीणां पुरुषाणां च कृते चिन्तनस्य जीवनस्य नूतनानाम उपायानां च कल्पनां कृतवत्यः।

अहं पाकशालायाम् उपविष्टा आसं भोजनं पचामि स्म अहं श्रुतवती मम पतिः ज्येष्ठतमं पुत्रं कथयति- "विपिन! अहं स्वस्य चैतन्यभागवत-पुस्तकम् अत्र त्यक्तवान् । यदा अहम् एतत् अन्तः आनेतुं वदिष्यामि तदा भवान् एतत् अन्तः आनयतु।"

## रुकैयासखावत-हुसैन-मान्या तथा च लेडीलैंड इत्यस्य तस्याः स्वप्नः

*रुकैया-सखावत-हुसैन-मान्या कस्मिंश्चित् धनिके परिवारे अजायत यस्य पार्श्वे बहुभूमिः आसीत् । यद्यपि सा उर्दूं पठितुं लेखितुं च जानाति स्म परन्तु सा बाङ्ग्लाशिक्षातः आङ्ग्लशिक्षातः च निवारिता । तस्मिन् काले आङ्ग्लभाषा एतादृशी भाषारूपेण मन्यते स्म या बालिकानां पुरतः नूतनान् विचारान् स्थापयति स्म। रुकैया स्वस्य ज्येष्ठभ्रातुः भगिन्याः च सहयोगेन बाङ्ग्लाभाषाम् आङ्ग्लभाषां च लेखितुं पठितुं च ज्ञातवती। कालक्रमेण सा लेखिका जाता। 1905 तमे वर्षे यदा सा केवलं पञ्चविंशतिवर्षीया आसीत् तदा सा आङ्ग्लभाषायाः कौशलं प्राप्तुम् अभ्यासार्थं च काञ्चित् प्रसिद्धां कथां लिखितवती यस्याः शीर्षकम् आसीत् सुल्तानायाः स्वप्नः। कथायां सुल्तानानाम्न्याः कस्याश्चित् स्त्रियः कल्पना कृता आसीत् या लेडीलैंडनामके एकस्मिन् स्थाने प्राप्नोति । लेडीलैंड इति किञ्चित् एतादृशं स्थानम् आसीत् यत्र स्त्रीणां कृते पठितुं कार्यं कर्तुम् आविष्कारं च कर्तुं स्वतन्त्रता आसीत् । एतस्यां कथायां महिलाः मेघेभ्यः जायमानां वृष्टिं रोद्धुम् उपायान् अन्वेषयन्ति तथा च वायुकारयानानि चालयन्ति । लेडीलैण्ड इति स्थाने पुरुषाणाम् आक्रामक-भुशुण्डयः तथा च अन्यानि अस्त्राणि शस्त्राणि च स्त्रीणां बौद्धिकशक्तेः पराभवं प्राप्नुवन्ति स्म अपि च पुरुषाः एकस्मिन् पृथक्स्थाने प्रेष्यन्ते। सुल्ताना लेडीलैण्ड-मध्ये स्वभगिन्या साराहया सह यात्रार्थं गच्छति तदा तस्य नेत्रे उद्घटेते तथा च सा जानाति यत् सा केवलं स्वप्नं पश्यति स्म ।*



*यथा भवद्भिः दृष्टं रुकैया-सखावत-हुसैन-मान्या तस्मिन् समये स्त्रीणां वायुयानचालनस्य कारयानानां चालनस्य च स्वप्नानि पश्यन्ति स्म तदा बालिकानां कृते विद्यालयं प्रति गन्तुम् अपि अनुमतिः न आसीत् । अनेन प्रकारेण शिक्षया रुकैयायाः जीवनं परिवर्तितम् । रुकैया केवलं स्वयं शिक्षिता भूत्वा सन्तुष्टा न जाता । तस्याः शिक्षया तस्याः कृते स्वप्नदर्शनस्य लेखनस्य च एव शक्तिः न प्रदत्ता परन्तु ततोऽपि आधिक्येन कर्तुं शक्तिः प्रदत्ता । 1910 तमे वर्षे सा कोलकातानगरे बालिकानां कृते विद्यालयम् उद्घाटितवती यः अद्यापि कार्यं करोति ।*

सः पुस्तकं तत्रैव परित्यज्य गतवान् । यदा पुस्तकम् अन्तः स्थापितम् अहं गुप्तरूपेण तस्य एकं पृष्ठं निष्कासितवती अपि च सावधानतया तत् गोपितवती । तस्य गोपनम् अपि किञ्चित् महत्कार्यम् आसीत् यतोहि तत् कोऽपि मम हस्ते न पश्येत् तथा मया आचरणीयम् आसीत् । लघुतमः पुत्रः तस्मिन् समये ताडपत्रेषु लेखनाभ्यासं कुर्वन् आसीत् । तेषु पत्रेषु अपि अहम् एकं गोपितवती । यदा अवसरम् अहं प्राप्नोमि स्म तदा अहं गत्वा तस्मिन् पत्रे तस्य पृष्ठस्य अक्षराणां मेलनस्य प्रयासं करोमि स्म । अहं तेषां शब्दानाम् अपि मेलनस्य प्रयासं कृतवती ये शब्दाः मया आदिनं श्रूयन्ते स्म । आधिक्येन प्रयत्नं कृत्वा अहं चिरकालानन्तरं पठनं लेखनं च ज्ञातवती।"

राससुन्दरीदेव्याः अक्षरज्ञानं तस्यै चैतन्यभागवतस्य अध्ययनस्य अवसरं दत्तवान्। स्वलेखनेन सा संसारस्य कृते स्त्रीणां तात्कालिकस्य जीवनस्य विषये ज्ञातुं कञ्चित् अवसरं दत्तवती । राससुन्दरीदेवी स्वदैनन्दिनजीवनस्य अनुभवान् विस्तरेण लिखितवती । एतादृशानि अपि दिनानि भवन्ति स्म यदा सा आदिनं क्षणं यावत् अपि विश्रान्त्याः अवसरं न प्राप्नोति स्म एतावान् कालः अपि न लभ्यते स्म यत् सा क्षणं यावत् उपविश्य किञ्चित् भक्षयितुं शक्नुयात् ।



***राससुन्दरीदेवी रुकैयाहुसैनमान्याः च ये साक्षरे भवितुम् अनुमतिं न प्राप्तवत्यौ आस्तां तयोः स्थितेः विपरीतं वर्तमानकाले भारते व्यापकसङ्ख्यायाम् अपि बालिकाः विद्यालयं गच्छन्ति । एतदतिरिच्य अपि बह्व्यः बालिकाः निर्धनतायाः कारणात् शिक्षण-सौविध्यानाम् अभावकारणात् तथा च भेदभावस्य कारणतः विद्यालस्यस्य गमनं त्यजन्ति । सर्वेषां समाजानां वर्गाणां च बालकानां कृते शिक्षणस्य समानरूपेण सौविध्यानां वितरणं विशेषतया बालिकानां कृते अद्यापि भारते किञ्चित् आह्वानम् अस्ति ।***

## *वर्तमान-काले शिक्षा विद्यालयाः च*

वर्तमानयुगे बालकाः बालिकाः च विशालायां सङ्ख्यायां विद्यालयं प्रति गच्छन्ति परन्तु तथापि वयं पश्यामः यत् बालिकाबालकयोः शिक्षायां भेदः अस्ति । भारते प्रतिदशवर्षं जनगणना भवति यस्यां सम्पूर्णस्य देशस्य जनसङ्ख्यायाः गणना क्रियते । एतस्यां भारतवासिनां जीवनस्य विषये अपि विस्तृता सूचना एकत्रीक्रियते यथा तेषाम् आयुषः अध्ययनस्य तैः कृतानां कार्याणां च विषये ज्ञायते। एतस्य सूचनायाः प्रयोगं वयम् अनेकेषां तथ्यानाम् आकलनार्थं कुर्मः यथा शिक्षितजनानां सङ्ख्या तथा च स्त्रीपुरुषयोः अनुपातः। 1961 इत्यस्य जनगणनायाः अनुसारं सर्वेषां बालकानां पुरुषाणां (सप्तवर्षीयाः अपि च ततोऽधिकाः आयुषः) 40 प्रतिशतं शिक्षितवर्गः आसीत् । एतस्य तुलनायां बालिकानां स्त्रीणां च केवलं 15 प्रतिशतं भागः शिक्षितः आसीत् । 2001 तम-वर्षस्य जनगणनायाः अनुसारं बालकानां पुरुषाणां च इयं सङ्ख्या वर्धित्वा 76 प्रतिशतम् अभवत् तथा च शिक्षित-बालिकानां स्त्रीणां च सङ्ख्या 54 प्रतिशतम् अभवत् । एतस्य अभिप्रायः अयम् अभवत् यत् स्त्रीपुरुषयोः

मध्ये एतादृशानां जनानाम् अनुपातः वर्धितः अस्ति ये साक्षरं भवितुं शक्नुवन्ति तथा च ये स्वल्पेन शिक्षां प्राप्तवन्तः सन्ति। परन्तु यथा भवन्तः द्रष्टुं शक्नुवन्ति अधुना अपि स्त्रीणां तुलनायां पुरुषाणां प्रतिशतता अधिका वर्तते। एतयोः मध्ये यत् अन्तरं वर्तते तत् अधुना समाप्तिं न गतम् अस्ति।

अधोलिखित-तालिकायां विभिन्न-वर्गाणां तेषां बालकानां बालिकानां प्रतिशतं दर्शितम् अस्ति ये मध्ये एव विद्यालयं त्यजन्ति। शासकीय-शब्दावल्यां दलितानां कृते अनुसूचित-जातीनाम् अनुसूचित-जनजातीनां च कृते अनुसूचित-जनजाति-शब्दावल्याः उपयोगः क्रियते।

| विद्यालयस्य स्तरः | सम्पूर्णाः बालकाः % | अनु.जात्याः बालकाः % | अनु.जन.जात्याः बालकाः% | सम्पूर्णाः बालिकाः% | अनु.जात्याः बालिकाः% | अनु.जन.जात्याः बालिकाः% | योगः% |
|---|---|---|---|---|---|---|---|
| प्राथमिकस्तरे(कक्षा 1तः5) | 34 | 37 | 49 | 29 | 36 | 49 | 31 |
| माध्यमिकः इति(कक्षा 6तः8) | 52 | 57 | 69 | 53 | 62 | 71 | 52 |
| उच्चमाध्यमिक इति(कक्षा9तः 10) | 61 | 71 | 78 | 65 | 76 | 81 | 63 |

***स्रोतः – चयनित-शिक्षण-सर्वेक्षणं,भारतसर्वकारः 2003-04***

*माध्यमिकस्तरेण कति बालकाः विद्यालयं त्यजन्ति ?*

*शिक्षायाः कस्मिन् स्तरे भवद्भिः सर्वाधिकाः बालकाः विद्यालयं त्यजन्तः दृश्यन्ते ?*

*भवतां विचारानुसारम् अन्येषां वर्गाणां तुलनायाम् आदिवासिबालकानां बालिकानां विद्यालयस्य त्यागस्य मात्रा अधिका किमर्थम् अस्ति?*

सम्भवतः भवद्भिः उपरि-प्रदत्त-तालिकायाम् एतस्मिन् विषये अवधानं कृतं स्यात् यत् सर्वासां बालिकानां श्रेण्याः तुलनायाम् अनुसूचित-जातीनां तथा च अनुसूचित-जनजातीनां च बालिकानां विद्यालयस्य त्यागस्य प्रतिशतता अधिका अस्ति । एतस्य अर्थः अयं जातः यत् दलितपृष्ठभूमेः आदिवासिपृष्ठभूमेः च बालिकानां विद्यालये पठनस्य सम्भावना अत्यल्पा भवति। २००१ तम-वर्षस्य जनगणनया इदम् अपि ज्ञायते यत् दलित-आदिवासिनीनां बालिकानाम् अपेक्षया मुस्लिमबालिकानां प्राथमिकशिक्षायाः सम्पूर्णतया ग्रहणस्य सम्भावना इतोऽपि न्यूनतरा भवति। मुस्लिमबालिकाः विद्यालये प्रायः त्रीणि वर्षाणि यावत् तिष्ठन्ति अपरञ्च अन्यसमुदायानां बालिकाः विद्यालये चत्वारिवर्षाणि यावत् तिष्ठन्ति।

दलितबालकानाम् आदिवासि-बालकानां मुस्लिमवर्गस्य बालकानां च विद्यालयस्य त्यागस्य बहूनि कारणानि सन्ति। देशस्य अनेकेषु भागेषु विशेषतया ग्रामीणेषु तथा च निर्धनक्षेत्रेषु नियमितरूपेण पाठनस्य कृते उचितरूपेण विद्यालयाः न सन्ति न च शिक्षकाः सन्ति। यदि विद्यालयः गृहस्य समीपे न स्यात्, तथा च नयनस्य आनयनस्य च कृते कस्यचित् साधनस्य व्यवस्था, यथा बसयानस्य अथवा वैन इत्यादिकस्य वा न स्यात् तर्हि अभिभावकाः बालिकाः विद्यालयं न प्रेषयितुम् इच्छन्ति।

केचन परिवाराः अत्यन्तनिर्धनाः भवन्ति तथा च स्वस्य सर्वान् बालकान् पाठयितुं व्ययं न कर्तुं शक्नुवन्ति। एतादृश्याम् अवस्थायां बालकाः प्राथमिकतां भजन्ते। बहवः जनाः एतस्मात् कारणाद् अपि विद्यालयं त्यजन्ति यतोहि तैः सह तेषां शिक्षकाः सहपाठिनः च भेदभावं कुर्वन्ति यथा ओमप्रकाश-वाल्मीकिना सह अभवत्।




***बालकाः बालिकाः च***

*प्राथमिककक्ष्यासु विद्यालय-त्यक्तॄणां बालकानाम् अङ्कान् उपरि-प्रदत्त-तालिकासु स्वीकृत्य दण्डरेखायाः रूपेण दर्शयन्तु । आदितः प्रथमौ द्वौ अङ्कौ भवतां कृते दण्डरेखायाः रूपेण दर्शितौ स्तः।*

## *महिलान्दोलनम्*

अधुना महिलाः बालिकाः च विद्यालयं गन्तुं प्राप्ताधिकाराः सन्ति । अन्यानि क्षेत्राणि अपि सन्ति यथा अधिनियमेषु परिष्कारः हिंसा स्वास्थ्यं च यत्र बालिकानां महिलानां च स्थितिः परिष्कृता जाता । एतानि परिवर्तनानि स्वयमेव न जातानि। महिलाभिः व्यक्तिगतस्तरेण तथा च सम्भूय एतेषां परिवर्तनानां कृते सङ्घर्षाः कृताः। एते सङ्घर्षाः एव महिलान्दोलनम् इति उच्यन्ते । देशस्य विभिन्नेभ्यः भागेभ्यः बह्व्यः महिलाः अनेकानि महिला-सङ्घटनानि च एतस्य आन्दोलनस्य भागरूपाणि सन्ति । बहवः पुरुषाः अपि महिला-आन्दोलनस्य समर्थनं कुर्वन्ति। एतस्मिन् आन्दोलने युक्तानां जनानां परिश्रमः निष्ठा तथा च तेषां विशेषताः एतत् आन्दोलनं किञ्चित् जागरूक-आन्दोलनरूपेण प्रस्तुवन्ति । एतस्मिन् चेतनायाः जागरणार्थं भेदभाव-मानसिकतया सह योद्धुं तथा च न्यायस्य प्राप्त्यर्थं विभिन्नानां रणनीतीनाम् उपयोगः कृतः अस्ति। एतेषां कानिचन दृश्यानि अत्र भवन्तः द्रष्टुं शक्नुवन्ति।



# *अभियानम्*

भेदभावनायाः हिंसायाः च विरोधे अभियानस्य आयोजनं महिला-आन्दोलनस्य कश्चित् महत्त्वपूर्णः भागः अस्ति। अभियानानां परिणामरूपेण नूतनाः अधिनियमाः अपि निर्मिताः सन्ति। २००६तमे वर्षे कश्चित् अधिनियमः जातः अस्ति यस्मिन् गृह्यशारीरिक-हिंसया मानसिकहिंसया च पीडितानां महिलानां कृते अधिनियमसुरक्षा प्रदत्ता स्यात्।

अनेन एव प्रकारेण महिला-आन्दोलनस्य अभियानानां कारणतः १९९७ तमे वर्षे सर्वोच्चन्यायालयेन कार्यस्य स्थाने शैक्षणिकसंस्थानेषु च महिलानां यौनप्रताडनाभ्यः तासां रक्षणार्थं दिशानिर्देशाः प्रदत्ताः सन्ति।

एकम् उदाहरणं पश्यामः चेत् 1980 तमे दशके सम्पूर्णस्य देशस्य महिला-सङ्घटनानि यौतुकधनस्य कारणेन जातानां हत्यानां विरोधं कृतवन्ति । नवविवाहित-युवतयः यौतुकधन-प्राप्तेः लोभात् पतिपक्षीयैः जनैः हन्यन्ते स्म । महिलासङ्घटनैः एतादृशीनां घटनानां महती आलोचना कृता यत् अधिनियम-शासनम् अपराधिनां कृते कठोरां दण्डव्यवस्थां न करोति । एतस्य विरोधे महिलाः राजमार्गेषु आगतवत्यः। ताः न्यायालयस्य शरणं गतवत्यः तथा च परस्परम् अनुभवानां सूचनानां च आदान-प्रदानं कृतवत्यः। अन्ते, अयं समाजस्य कश्चित् महान् सार्वजनिक-चर्चायाः विषयः जातः तथा च समाचारपत्रेषु अपि नैरन्तर्येण प्रकाशितः। यौतुकधनसम्बन्धितः अधिनियमः परिवर्तितः, येन यौतुकधनस्य याचना-कर्तारः परिवाराः दण्डिताः भवेयुः।



***सत्यारानीमहोदया महिलान्दोलनानां काचित् सक्रिया सदस्या यौतुकधनस्य कृते हता स्वस्य पुत्र्याः विषये न्यायार्थं कृतस्य लम्बतरस्य अभियोगस्य न्यायसम्बन्धीकर्गदैः आवृत्ताः सर्वोच्चन्यायालयस्य सोपानेषु उपविष्टा अस्ति।***





## *जागरूकतायाः वर्धनम्*

**म**हिलानाम् अधिकाराणां सम्बन्धेषु समाजे जागरूकतायाः वर्धनम् अपि महिला-आन्दोलनानां किञ्चित् प्रमुखं कार्यम् अस्ति। गीतानां वीथिनाटकानां जनसभानां च माध्यमेन तत् स्व-सन्देशं जनानां मध्ये प्रापयति।






## *विरोधप्रदर्शनम्*

यदा महिला-हितानाम् उल्लङ्घनं भवति यथा केनचित् अधिनियमेन अथवा नीत्या तदा आन्दोलनम् एतादृशानाम् उल्लङ्घनानां विरोधे स्वध्वनिं मुखरां करोति। जनानाम् अवधान-आकर्षणाय प्रदर्शनानि पदयात्राः इत्यादयः अनेके उपायाः सन्ति।



# बन्धुत्वस्य व्यक्तीकरणम्

न्यायस्य अन्यैः विषयैः सह तथा च महिलाभिः सह बन्धुत्वभावनायाः प्रकटनम् अपि  महिला-आन्दोलनस्य एव भागः अस्ति।

मार्चमासस्य अष्टमे दिनाङ्के अन्ताराष्ट्रीय-महिलादिवसं सम्पूर्णे विश्वे महिलाः स्वसङ्घर्षान् नवीनीकर्तुं तथा च प्रसन्नतायाः व्यक्तीकरणार्थं एकत्रिताः भवन्ति।






प्रतिवर्षम् अगस्तमासस्य चतुर्दशदिनाङ्के भारत-पाकिस्तानयोः सीम्नि सहस्राधिकाः जनाः एकत्रिताः भवन्ति तथा च कस्यचित् सांस्कृतिक-कार्यक्रमस्य आयोजनं कुर्वन्ति। उपरि प्रदत्ते चित्रे भारतस्य पाकिस्तानस्य च जनानां मध्ये बन्धुत्वं प्रदर्शयितुं महिलाः ज्वलन्तीः सिक्थवर्तिकाः उत्थापयन्ति।



# अभ्यासः

१ भवतां चिन्तनेन महिलानां विषये प्रचलिताः रूढिवादिन्यः धारणाः याः सन्ति यत् ते किं कर्तुं शक्नुवन्ति किं वा न कर्तुं शक्नुवन्ति ताः महिलानां समानतायाः अधिकारं कथं प्रभावयन्ति ?

२ किमपि एकं कारणं ज्ञापयन्तु यस्य कारणेन राससुन्दरीदेव्याः रमाबाईमान्यायाः तथा च रुकैया-हुसैन-महोदयायाः च कृते अक्षरज्ञानम् एतावत् महत्त्वपूर्णम् आसीत् ।

३ निर्धनबालिकाः अध्ययनम् अपूर्णम् एव त्यजन्ति यतोहि शिक्षायां तासां रुचिः नास्ति । सप्तदशे पृष्ठे प्रदत्तम् अनुच्छेदं पठित्वा स्पष्टं कुर्वन्तु यत् एतत् कथनं सत्यं किमर्थं नास्ति ?

४ किं भवन्तः महिला-आन्दोलनेन व्यवहारे आनीतानां सङ्घर्षाणां द्वयोः प्रकारयोः विषये ज्ञापयितुं शक्नुवन्ति ? 'महिलाः किं कर्तुं शक्नुवन्ति तथा च किं न' एतस्मिन् विषये भवद्भिः रूढीनां विरोधे सङ्घर्षः करणीयः स्यात् तर्हि भवन्तः पठितेषु विधिषु केषां विधीनां प्रयोगं करिष्यन्ति ? भवन्तः एतस्य विशिष्टस्य विधेः उपयोगं किमर्थं करिष्यन्ति ?

## शब्द-सङ्कलनम्

रूढिवादिधारणा – यदा वयं विश्वासं कर्तुम् आरभामहे यत् कस्यचित् विशिष्टस्य धार्मिकस्य आर्थिकस्य क्षेत्रीयसमूहस्य च जनानां काश्चन विशिष्टताः भवन्ति एव अथवा ते केवलं विशिष्ट-प्रकारकम् एव कार्यं कर्तुं शक्नुवन्ति तदा रूढिवादि-धारणानां जन्म भवति। यथा अस्मिन् पाठे वयं दृष्टवन्तः यत् बालिकाः बालकाः च विभिन्नान् विभिन्नान् विषयान् स्वीकुर्युः इति ते आदिष्टाः। कारणं रुच्यानुसारं ते तथा कुर्युः इति न आसीत् परन्तु बालिकाबालकयोः आधारेण तैः तथा करणीयम् आसीत् । रूढिवादिधारणाः जनानां तेषां वैयक्तिक-विशिष्टताभिः सह दर्शनात् अस्मान् रुन्धन्ति ।

भेदभावः (भावना) - भेदभावः तदा भवति यदा वयं जनैः सह समानतायाः आदरस्य च व्यवहारं न कुर्मः। एतादृशं तदा भवति यदा जनः अथवा संस्थाः पूर्वाग्रहेण ग्रसिताः भवन्ति । भेदभावः तदा भवति यदा वयं केनापि सह पृथक् व्यवहारं कुर्मः अथवा भेदमानसिकतया व्यवहरामः।

उल्लङ्घनम् - यदा कश्चित् बलात् अधिनियमस्य उल्लङ्घनं करोति अथवा मुक्तरूपेण कस्यचित् अपमानं करोति तदा वयं वक्तुं शक्नुमः यत् सः उल्लङ्घनं कृतवान् अस्ति ।

यौनप्रताडना – एतस्य अभिप्रायः अयं वर्तते यत् यदा कश्चित् महिलायाः इच्छां विरुध्य तया सह यौनसम्बद्धां शारीरिकीं मौखिकीं च काञ्चित् क्रियां करोति तदा सा यौनप्रताडना इति उच्यते ।